## द्वादशः पाठः

# कर्त्तव्यपालनम्

**समाजे प्रत्येकस्य जनस्य कृते कर्त्तव्यं निश्चितं भवति। विविधस्थानेषु स्थिताः जनाः स्वकीयं कर्त्तव्यं निर्वहेयुः। राजा, प्रजाः, अधिकारिणः, मातापितरौ, पुत्राः, बान्धवाः, इत्यादीनां सर्वेषां कृते सामाजिकं कर्त्तव्यम् उत्तरदायित्वञ्च निश्चितमस्ति। भारतीयधर्मशास्त्रग्रन्थेषु कर्त्तव्यपालनस्य महत्त्वं बहुधा प्रतिपादितं वर्तते।**

**शिक्षकः** – मानवसमाजविकासाय किमावश्यकम्?

**दिव्यांशः** –सर्वे मानवाः स्वस्वकर्मणिरताः भवेयुः, सत्यकार्याणि कुर्युः।

**शिक्षकः** – मानवैः कृतानां कार्याणां प्रयोजनं किम्?

**विशालः** – चतुर्विधपुरुषार्थप्राप्तिः -स्वजीवनयापनम् समाजसेवा, देशसेवा, सौख्यम्, मौक्षप्राप्तिश्च मानवकार्याणां प्रयोजनम्।

**शिक्षकः** – आम् ! तान्येव तेषां कर्तव्यानि सन्ति अतस्ते स्व स्व कर्त्तव्यानि सम्पादयन्तः स्व स्व देशस्य राष्ट्रस्य वा कल्याणं कुर्वन्ति। एतदेव कर्तव्यपालनम्।

**मीमांसा** – किं सर्वेषां जनानां कर्त्तव्यानि पृथक्-पृथक् भवन्ति अथवा समानानि एव भवन्ति।

**शिक्षकः** – इयम् भूमिः कर्मभूमिः अस्ति, कर्त्तव्यभूमिः अस्ति। अस्मिन् संसारे यावन्तः जनाः जन्म गृह्णन्ति तेषां सर्वेषामपि पृथक्-पृथक् कर्त्तव्यानि भवन्ति। तानि अनेकविधानि भवन्ति। कानिचित् व्यक्तिगतानि, कानिचित् पारिवारिकाणि, कानिचिच्च सामाजिकानि भवन्ति। एवं च प्रत्येकमनुष्यस्योपरि अनेकविधानां कर्त्तव्यानां पालनस्य महान् भारो वर्तते। एकोऽपि एवं विधः मनुष्यः नास्ति, यस्य किमपि कर्त्तव्यं न स्याद्, यदि तस्य शरीरं बुद्धिर्वा व्यापन्ना नास्ति।

**वेदान्तः** – कर्त्तव्यपालनं सर्वेषां जनानां कृते किमर्थम् आवश्यकम् अस्ति ?

**शिक्षकः** – कर्त्तव्यपालनं जनस्य स्वहिताय देशहिताय सर्वहिताय च परमावश्यकम्। ये स्वकर्त्तव्यानां समुचित-रूपेण पालनं कुर्वन्ति तेषामेव श्रेष्ठपुरुषेषु गणना भवति। ते न केवलम् आत्मनः एव प्रत्युत् सम्पूर्णस्यापि देशस्य हितसाधनं कुर्वन्ति।

**नरेन्द्रः** – यदि जनाः स्वकर्त्तव्यपालनं न कुर्वन्ति तर्हि किं भविष्यति ?

**शिक्षकः** – यदि जनाः स्वकर्त्तव्यपालनं न कुर्युः तर्हि समाजस्य कापि व्यवस्था भवितुं न अर्हति। कल्पनां कुरु – यदि अध्यापकाः सम्यक् न अध्यापयेयुः, विद्यार्थिनः परिश्रमेण न पठेयुः, न्यायाधीशाः समुचितरूपेण न्यायं न कुर्युः, शासकाः समीचीनतया शासनकार्यं न सम्पादयेयुः, कर्मकराः स्वानि स्वानि कर्माणि सम्यक् न विदध्युः, कृषकाः कृषिकार्यं श्रमेण न कुर्युः तर्हि देशस्य कथमपि उन्नतिः भविष्यति वा ? नैव भविष्यति।

**स्नेहलः** – किम् अस्माकं देशे सर्वे जनाः कर्त्तव्यपालनं कुर्वन्ति ?

**शिक्षकः** – देशस्य कृते महतः दुर्भाग्यस्य अयं विषयः वर्तते यत् साम्प्रतिकेषु जनेषु कर्त्तव्यपालनं प्रति महती शिथिलता समागता वर्तते। नैकाः जनाः श्रमेण, सत्येन, निष्ठया च कार्यं कर्तुं न वाञ्छन्ति, वञ्चनया एव स्वार्थसाधनं कर्तुं कामयन्ते। अधिकारार्थं सर्वे कलहं कुर्वन्ति परं कर्त्तव्यपालने ध्यानं न ददति। देशस्य यावान् अर्थव्ययः

समयव्ययः च भवति तावती न कार्यसिद्धिः। यदि जनाः कर्त्तव्यपालनं प्रति ध्यानं ददति तर्हि देशस्य राजकीया अराजकीया वा कापि उन्नतियोजना समुचितरूपेण पूर्णरूपेण फलवती भविष्यत्येव।

अतोऽस्माभिः सङ्कल्पः करणीयः यत् वयं स्वकर्त्तव्यपालनम् अवश्यमेव करिष्यामः कर्त्तव्यपालनमेव आत्मनः देशस्य च समुन्नतेः मूलमन्त्रः।

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| यापनार्थम् | – | बिताने के लिये, चलाने के लिये | यावन्तः | – | जितने |
| व्यापन्ना | – | नष्ट, बिगड़ी हुई, विकल | गणना | – | गिनती |
| आत्मनः | – | स्वयं का | समीचीनरूपेण | – | ठीक प्रकार से |
| महतः | – | बहुत बड़ा | वाञ्छन्ति | – | चाहते हैं |
| वञ्चनया | – | छल से, कपट से | कलहम् | – | लड़ाई, झगड़ा |
| राजकीया | – | शासकीय, सरकारी | अराजकीया | – | अशासकीय, निजी |
| तावती | – | उतनी | यावान् | – | जितना |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) जनाः वञ्चनया किं कर्तुं कामयन्ते ?

(ख) आत्मनः देशस्य वा समुन्नतेः मूलमन्त्रः कः ?

(ग) जीवने किम् आवश्यकम् ?

(घ) कर्त्तव्यपरायणानां गणना कुत्र भवति ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) कृषकाः देशस्य उन्नतिं कथं कुर्वन्ति ?

(ख) कर्त्तव्यपालनं किमर्थम् आवश्यकं वर्तते ?

(ग) यदि जनाः स्वकर्त्तव्यपालनं न कुर्वन्ति तर्हि किं भविष्यति ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) कर्त्तव्यपालनं किमर्थम् आवश्यकम् ?

(ख) ये कर्त्तव्यपालनं कुर्वन्ति ते केषां हितसाधनं कुर्वन्ति ?

(ग) देशस्य उन्नतियोजना केन कथम् अधिकफलवती भवेत् ?

## ( 4 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | अध्यापकाः | कर्माणि |
| (ख) | न्यायाधीशाः | कृषिकार्यम् |
| (ग) | कर्मकराः | अध्यापनम् |
| (घ) | कृषकाः | पठनम् |
| (ङ) | विद्यार्थिनः | न्यायम् |

## ( 5 ) रिक्तस्थानानि पूरयत –

(क) देशे सर्वे जनाः . . . . . . . . . . . . . . कुर्वन्ति।

(ख) जनेषु कर्त्तव्यपालनं प्रति महती . . . . . . . . . . . . . . समागता वर्तते।

(ग) जनाः . . . . . . . . . . . . . . एव स्वार्थसाधनं कर्त्तुं कामयन्ते।

(घ) इयम् भूमिः . . . . . . . . . . . . . . अस्ति।

(ङ) कर्त्तव्यपालनमेव आत्मनः देशस्य वा . . . . . . . . . . . . . . मूलमन्त्रः।

## ( 6 ) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत– उदाहरणं यथा –

| | | |
|---|---|---|
| | **जीवने कार्यम् आवश्यकम् अस्ति।** | **आम्** |
| | **कर्त्तव्यपालनम् आवश्यकं नास्ति।** | **न** |
| (क) | नैकाः जनाः वञ्चनया एव स्वार्थसाधनं कर्त्तुं कामयन्ते। | |
| (ख) | स्वकर्त्तव्यपालनं न करणीयम्। | |
| (ग) | कर्त्तव्यपालनमेव देशस्य समुन्नतेः मूलमन्त्रः। | |
| (घ) | मनुष्योपरि अनेकविधानां कर्त्तव्यानां पालनस्य महान् भारो वर्तते। | |
| (ङ) | इयम् भूमिः कर्मभूमिः नास्ति। | |

## ( 7 ) क्रियापदानां धातुं वचनं पुरुषं च लिखत

| | क्रियापदानि | धातुः | पुरुषः | वचनम् |
|---|---|---|---|---|
| **यथा** | **भवन्ति** | **भू** | **प्रथमपुरुषः** | **बहुवचनम्** |
| (क) | कुर्वन्ति | – – – – – – – | – – – – – – – | – – – – – – – |
| (ख) | पठेयुः | – – – – – – – | – – – – – – – | – – – – – – – |
| (ग) | अस्ति | – – – – – – – | – – – – – – – | – – – – – – – |
| (घ) | कथ्यते | – – – – – – – | – – – – – – – | – – – – – – – |
| (ङ) | सन्ति | – – – – – – – | – – – – – – – | – – – – – – – |

**( 8 ) सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –**

(क) एकोऽपि - - - - - - - - + - - - - - - - - = - - - - - - - - ।

(ख) प्रत्येकम् - - - - - - - - + - - - - - - - - = - - - - - - - - ।

(ग) सम्पूर्णस्यापि - - - - - - - - + - - - - - - - - = - - - - - - - - ।

(घ) कानिचिच्च - - - - - - - - + - - - - - - - - = - - - - - - - - ।

**( 9 ) उदाहरणानुसारं शब्दानां विभक्तिं वचनं च लिखत –**

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **यथा** | **तेषाम्** | **षष्ठी विभक्तिः** | **बहुवचनम्** |
| (क) | इयम् | | |
| (ख) | संसारे | | |
| (ग) | श्रमेण | | |
| (घ) | देशस्य | | |
| (ङ) | पालने | | |

**( 10 ) निम्नाङ्कितैः अव्ययैः वाक्यनिर्माणं कुरुत –**

**यथा– सः अपि पठति।**

(क) यदि – तर्हि

(ख) यतः – ततः

(ग) यावत् – तावत्

(घ) एव

(ङ) कृते

**योग्यताविस्तारः –**

- सरदारपटेलस्य जीवनविषये पठत आचरत च।

❖ ❖ ❖